देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्ता-पत्रिका

# रघुनाथवार्तावली

## आचार्य-रामकरणशर्म-स्मृतिविशेषाङ्कः

तृतीयवर्षम् ( २०१८ ) अङ्कः १०		अक्टूबर-दिसम्बर, २०१८



( आविर्भावः-20 मार्च, 1927 )		( तिरोभावः-18 दिसम्बर, 2018 )

रमन्ते योगिनो यस्मिन् स रामः पुरुषोत्तमः।
रमन्ते पाठका यस्मिन् स रामकरणस्स्मृतः॥

नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः॥

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः॥

प्रधानसम्पादकः
प्रो. के.बी. सुब्बरायुडुः
( प्राचार्यः )

सम्पादकौ
प्रो. बनमालीबिश्वालः
डा. प्रफुल्लगडपालः


'रघुनाथवार्तावली'-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org


देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

रघुनाथवार्तावली

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः, पौडी-गढवालः
उत्तराखण्डः-249 301
(दूरभाषः - 01378-266028)
email : srkcampus@gmail.com
website : www.srkcampus.org




## पुरोवाक्

त्रैमासिक्या वार्तावल्या दशमाङ्कः समयेन प्रकाश्यते इति महतः प्रमोदस्य विषयः। अयञ्च अङ्कः दिवङ्गतात्मनः आचार्य-रामकरणशर्मणः स्मृतौ निवेद्यते। आचार्यः रामकरण-शर्माणो (१८.१२.२०१८) दिनाङ्के दिवंगताः। ते च संस्थाने नैकवर्षाणि यावत् निदेशकाः आसन्। संस्थानस्य कुलगीतलेखकाश्च एते विश्वविद्यालयद्वये (आदौ कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालये ततश्च काश्यां सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये) कुलपतयः अभवन्। अनेन विशेषाङ्कमाध्यमेन तेभ्यः परिसरपक्षतः श्रद्धाञ्जलिः समर्प्यते। अस्मिन्नङ्के तत्सम्बद्धं साहित्यमपि प्रकाश्य मोदमनुभवामः।

एतस्मिन्नङ्के अन्ये च समे स्थायिनः स्तम्भाः प्रकाशिताः। एतदवधौ परिसरे सम्पन्नं वृत्तजातमपि प्रकाशितमस्ति। जनवरी-फरवरीमासयोः विभागीयाः राष्ट्रियाः अन्ताराष्ट्रीयाः संगोष्ठ्यश्च परिसरे समायोक्ष्यन्ते इति सूचनाः अपि अत्र प्रदत्ताः सन्ति। एवमेव प्रवर्तिष्यमाणानां विविधविभागीय-विशिष्टव्याख्यानानां विवरणमपि प्रदत्तं वर्तते। उत्तराखण्ड-संस्कृत-शिक्षक-सम्मेलनमपि एतदवधौ आयोजितम्। तदनु परिसरे राज्यस्तरीयाः शास्त्रीयस्पर्धाः अपि समायोजिता, यासां विवरणमत्र वार्तामुखेन द्रष्टुं शक्यते। पूर्वाङ्कैः सह वर्तमानाङ्कस्य ई-प्रतयः परिसरीये अन्तर्जालपुटे स्थापयिष्यन्ते। एवमत्रत्या सामग्री सर्वजनग्राह्या भवितुमर्हति। जयतु संस्कृतम्।

-के.बी. सुब्बरायुडुः

## प्रतिस्पन्दः




श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजितायां शिक्षासन्दर्भ-कोषसम्बद्ध-कार्यशालायां सुहृदा प्रो. बनमाली-बिश्वालेन श्रीरघुनाथवार्तावल्याः नवमोऽङ्कः उपहृतः। परिसरीय-विविधवृत्तजातैः संस्कृतसप्ताहसम्बद्धाभिः वार्ताभिश्च सुसज्जितोऽयम् अङ्कः नितरां हृद्यः। साहित्यखण्डे प्रकाशितं समग्रं साहित्यं विशिष्य स्तोत्रसाहित्यं सहृदयमनांसि रञ्जयितुं नितरां समर्थमस्ति। अस्य अङ्कस्य सम्पादनार्थं सम्पादकौ प्रो. बनमालीबिश्वाल-डा. प्रफुल्लगडपालमहोदयौ अभिनन्दनीयौ।

विनूतनेऽस्मिन् परिसरे कस्याश्चित् वार्तावल्याः प्रकाशनं परिसरीयविदुषां शैक्षिकीं प्रतिबद्धतां रेखाङ्कयति। वर्धतामियं रघुनाथवार्तावली इति कामयमानो विरमामि।

शुभेच्छुः
प्रो. अरुणरञ्जनमिश्रः
आचार्यः, संस्कृतविभागः
विश्वभारती-शान्तिनिकेतनम्, बोलपुरम्, पश्चिमबङ्गः

## सम्पादकीयम्

अङ्काश्च नवसंख्याका: पूर्वमासन् प्रकाशिता:।
मासत्रयात्परं सद्यो नवीनोऽङ्क: प्रकाश्यते।१।

प्रारम्भे नववर्षस्य दशमाङ्क: सुसज्जित:।
वार्तावल्या विशेषाङ्क: पाठकेभ्यो निवेद्यते।२।

दिवङ्गतात्मने तस्मै रामकरणशर्मणे।
स्मृत्यङ्कमाध्यमेनात्र श्रद्धाञ्जलि: समर्प्यते।३।

तद्व्यक्तित्वं कृतित्वञ्च पाठकेभ्यो निवेदितुं।
तन्नाम्ना निर्मित: कश्चित् स्मृत्यङ्कोऽयं विशिष्यते।४।

अस्मिन् परिसरे ये ये कार्यक्रमास्स्वनुष्ठिता:।
तेषां विवरणञ्चात्र सचित्रं नु प्रकाशितम्।५।

सतर्कतादिवसोऽत्र सोत्साहं परिपालित:।
तस्याख्यानं यथास्थानं द्रष्टुमर्हन्ति पाठका:।६।

एकतादिवसोऽप्यत्र सोत्साहं पालित: समै:।
जातं शोधसमित्याश्च समयेनोपवेशनम्।७।

स्पर्धा: राज्यस्तरीयास्ता: परिसरे त्वनुष्ठिता:।
विजेतारो गमिष्यन्ति केचिद्राष्ट्रस्तरे पुन:।८।

उत्तराखण्डशिक्षायै बलं दातुं च बौद्धिकम्।
सम्मेलनं कृतं नवं परिसरप्रयत्नत:।९।

आयोक्ष्यन्तेऽचिरादेव सङ्गोष्ठ्योऽत्र विभागश:।
व्याख्यानानि विशिष्टानि चायोक्ष्यन्ते तदा पुन:।१०।

सत्रार्धीया: परीक्षाश्च सम्पन्ना: शान्तिपूर्वकम्।
विवरणञ्च सम्बद्धं यथास्थानं प्रकाशितम्।११।

अत्रास्ति कार्यवृत्तानां चित्रावली प्रकाशिता।
एवमत्र यथायोग्यमितिहास: सुरक्षित:।१२।

संस्कृति: भारतीया च साहित्येऽत्र समाश्रिता।
उत्तराखण्डसम्बद्धा प्राथम्येन प्रकाश्यते।१३।

संस्मरणानि सन्त्यत्र रामकरणशर्मणाम्।
सूचीरप्यवकाशानां प्रस्तुतेऽङ्के प्रकाशिता।१४।

पूर्वाङ्कवदयं नूनं पाठकैस्स्वीकरिष्यते।
प्रतिस्पन्दैर्विचारान् स्वान् सम्प्रेष्योत्साहयन्तु न:।१५।

-सम्पादका:

## प्रो. रामकरणशर्मविरचितम्

### संस्थान-कुलगीतम्

हिमगिरिवदनं समुद्रचरणं
गङ्गागोदासुधारसम्।
विश्वविश्ववन्दितसद्विद्यं
राष्ट्रियसंस्कृतसंस्थानम्।।१।।

योऽनूचान: स नो महानिति
शास्ति विमलमचलं भणितम्।
निखिलभारते व्याप्तपरिसरं
राष्ट्रियसंस्कृतसंस्थानम्।।२।।

सवेदवेदाङ्गषड्दर्शन-
पुराणकाव्यैरलङ्कृतम्।
बौद्धजैनशैवागममहितं
राष्ट्रियसंस्कृतसंस्थानम्।।३।।

एकं सत्यमनन्तविग्रहं
समुपास्तेऽनिशमेकस्थम्।
जयति जयति सद्विद्यारत्नं
राष्ट्रियसंस्कृतसंस्थानम्।।४।।

समेध्यति भारती: समस्ता:
प्रणमति निखिलां वसुन्धराम्।
जयति सकलपुरुषार्थसाधकं
राष्ट्रियसंस्कृतसंस्थानम्।।५।।

## आचार्यरामकरणशर्मभ्य: श्रद्धाञ्जलि:

सखेदं सूचनीयं वर्तते यत् प्रसिद्ध-आधुनिक-संस्कृत-कवय: परमविद्वांस: आचार्यरामकरणशर्माण: १८.१२.२०१८ दिनाङ्के नवदेहल्यां दिवं गता:।

एतेन मर्माहता: श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्य- समेता: समे प्राध्यापका: छात्राश्च १९.१२.२०१८ दिनाङ्के परिसरे आयोजितायां शोकसभायां सम्मिलिता: सन्त: दिवंगतेभ्य: श्रद्धाञ्जलिं समर्पितवन्त:। एतत्सम्बद्ध: शोकसन्देशश्च तत्परिवाराय सम्प्रेषित:।

# तस्मै पुण्यात्मने नमः

प्रो. बनमाली बिश्वालः



शिवपुरे बिहारेऽसौ लब्धजन्मा कविः पुमान्।
शिक्षायै पाटलिपुत्र-विश्वविद्यालयं गतः।१।

शिक्षामुच्चतरां प्राप्य हिन्दी-संस्कृतभाषयोः।
शोधोपाधिमवाप्तुं स्वां गतवान् कैलिफोर्नियाम्।२।

संस्थाने राष्ट्रिये दिल्ल्यां संस्कृताय समर्पिते।
योग्यताबलतो जातः वारत्रयं निदेशकः।३।

निर्व्यूढं कौलपत्यञ्च विश्वविद्यालय-द्वये।
आदौ कामेश्वरे काश्यां सम्पूर्णानन्दके ततः।४।

अतिथ्याचार्यरूपेण कोलम्बियादेशं गतः।
देशानन्यांश्च गत्वाऽसौ प्राध्यापयद्विदेशिनः।५।

विश्वविद्यालयेष्वेवं भारते भारताद् बहिः।
अध्यापयच्चिकागोषु पेनिन्सिल्वानियादिषु।६।

अन्ताराष्ट्रियसंघस्य प्राच्यविद्यापरस्य च।
अध्यक्षोऽयं मनोनीतः स्वयोग्यताऽनुरोधतः।७।

धर्मदर्शनवेदेषु कृतभूरिपरिश्रमः।
भाषाविज्ञाननिष्णातः व्याकरणे विचक्षणः।८।

बहूनि तेन काव्यानि संस्कृते रचितानि वै।
सन्ध्या-गगनवाणीभ्यां पाथेयशतकं पुनः ।९।

प्रसिद्ध्यतोऽपरे काव्ये मानसी-सर्वमङ्गले।
संस्कृतजगते तस्य चावदानं प्रभूतकम्।१०।

उपन्यासौ प्रसिद्धौ तौ सीमा-रयीश-संज्ञितौ।
गद्ये पद्ये तथा शोधे समाना तस्य वै गतिः।११।

मौलिकलेखनैस्साकं सम्पादनानुवादयोः।
कृतं कार्यं महत्तेन चायुर्वेदे विशेषतः।१२।

संस्थानकुलगीतञ्च भव्यं तस्य प्रसिद्ध्यति।
दिव्यं ज्ञानामृतं यस्मान्निस्यन्दते मुहुर्मुहुः।१३।

राष्ट्रपतिपुरस्कारं प्राप्तवान् प्रतिभावशात्।
साहित्याकादमि-मुख्यान् सम्मानान् लब्धवान्बहून्।१४।

रमन्ते योगिनो यस्मिन् स रामः पुरुषोत्तमः।
रमन्ते पाठका यस्मिन् स रामकरणः स्मृतः।१५।

रामादिवत्प्रवर्तितुं काव्यं शिक्षयति सदा।
एवं राम-करणेऽपि तत्प्रयासो महीयते।१६।

रामाणां करणाद्रामकरणोऽन्वर्थनामकः।
स्मितहासधनी कश्चिद् विस्मितविनयोपेतः।१७।

काव्यशास्त्र-प्रणेतारं निर्मातारं युगस्य वै।
आचार्यप्रवरं वन्दे रामकरणसंज्ञकम्।१८।

मानवजीवने चास्ति दीर्घायुषः फलं महत्।
पाठयित्वा स्वयं धन्यश्चतुरः पुरुषानसौ।१९।

नवत्यूर्ध्वे वयोदेशे विद्वद्वरो दिवं गतः।
कवये कीर्तिशेषाय तस्मै पुण्यात्मने नमः।२०।

## राज्यस्तरीय-शास्त्रीयस्पर्धा: आयोजिता:

राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे १५-११-२०१८ त: १७-११-२०१८ दिनाङ्कं यावत् 'राज्यस्तरीय-शास्त्रीय-स्पर्धा (२०१८) आयोजिता यदन्तर्गतं परिसरीय-विद्यालयीय-महाविद्यालयीय-विश्वविद्यालयीय-छात्र-छात्राभि: विविध-प्रतियोगितासु भागग्रहणं कृतम्। अस्याश्चाधिराज्यीयस्पर्धाया: उद्घाटनसत्रं वैदिक-मन्त्रोच्चारणदीपप्रज्वलनपुरस्सरं समारब्धम्। उद्घाटनसत्रे श्री आर.पी. यादव: तथा श्री ए.के. राय: च विशिष्टातिथी आस्ताम्। अस्मिन् सत्रे परिसरप्राचार्य: प्रो. के. बी. सुब्बरायुडु-महोदय: अध्यक्षरूपेण उद्बोधितवान्। मुख्यातिथिमहोदयेन प्रो. देवीप्रसादत्रिपाठिना उक्तं यत् 'एतादृशीभि: प्रतियोगिताभि: शास्त्ररक्षा सम्भवति। अत: सर्वै: छात्रै: अस्यां दिशि श्रम: करणीय:।



राज्यस्तरीयशास्त्रीयस्पर्धाया: किञ्चन दृश्यम्

आसु स्पर्धासु बाह्यनिर्णायकरूपेण हरिद्वारस्थ-उत्तराखण्ड-संस्कृत-विश्व-विद्यालयस्य व्याकरणविभागाध्यक्ष: डा. शैलेशतिवारी-महोदय: तथा तिरुपतिस्थो डा. रंगाचार्यशतावधानीमहोदय: समागत्य स्वदायित्वं सम्पादितवन्तौ। एवमेव अस्यां स्पर्धायां परिसरप्राचार्यसमेता: निम्नलिखिता: विभिन्नविभागीय-परिसरीय-प्राध्यापका अपि विविधास्पर्धासु आन्तरिकनिर्णायकत्वेन भागमलभन्त–डा. आर. बालमुरुगन्, डा. कृपाशङ्कर शर्मा, डा. प्रफुल्लगडपाल:, डा. शैलेन्द्रप्रसादउनियाल:, डा. मुकेशशर्मा, श्रीश्रीओमशर्मा, डा. सुरेशशर्मा, डा. नीतेशद्विवेदी चेति।

१७.११.२०१९ तमे दिनाङ्के आसां स्पर्धानां समारोपकार्यक्रम: आचरित:। स च कार्यक्रम: परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडु-महोदयस्य आध्यक्ष्ये पूर्णतामगात्। अध्यक्षेन परिसर-प्राचार्येण उक्तं यत् एषु केचन विजेतार: अखिलभारतीयशास्त्रीयस्पर्धायामपि उत्तमं प्रदर्शनं कृत्वा विजेतारो भविष्यन्ति। विशिष्टातिथिना डा. राकेशभट्टमहोदयेन उक्तं यत् 'स्पर्धालव: इतोऽपि परिश्रमं कृत्वा स्वप्रदर्शनमुत्तमादप्युत्तमं कर्तुं शक्नुवन्ति। अस्मिन्नवसरे विशिष्टातिथि-महोदयेन डा. शैलेशतिवारिमहोदयेन उक्तं यत् संस्कृतस्य समुन्नतौ एतादृशीनां संस्कृतस्पर्धानां परिचर्चानां च महती आवश्यकताऽस्ति। सारस्वतातिथिना डा. रंगाचार्यशतावधानीमहोदयेन उक्तं यत् आभि: स्पर्धाभि: प्रेरिता: छात्रा: स्वाध्यायोन्मुखा: भविष्यन्ति।

अस्या: अधिराज्यीयस्पर्धाया: संयोजनं डा. आर. बालमुरुगमहोदयेन विहितम्। एवञ्च सहसंयोजनदायित्वं डा. प्रफुल्लगडपालेन निर्व्यूढम्। अस्मिन्नवसरे न केवलं समागता अतिथय:, किन्तु समेऽपि परिसरप्राध्यापकाश्च छात्राणां कृते शुभकामना: प्राददु:।

अधिकाधिकसंख्यायां भागग्रहीतृषु प्रतिभागिषु अधोलिखिता: विजेतार: पुरस्कृता: अभवन्–

### प्रतियोगिता-परिणाम:

| नाम | कक्षा | संस्था | स्थानम् |
|---|---|---|---|
| **१. काव्यकण्ठपाठ:** | | | |
| **देवव्रत:** | उत्तरमध्यमाप्रथमवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठ-गुरुकुलम्, पौन्धा, देहरादूनम् (उ.ख.) | प्रथमम् |
| **दीपकनौटियाल:** | प्राक्शास्त्रीप्रथमवर्षम् | रा.सं.सं., श्रीरघुनाथकीर्तिपरिसर:, देवप्रयाग: (उ.ख.) | द्वितीयम् |
| **२. भगवद्गीताकण्ठपाठ:** | | | |
| **सत्यम्** | कक्षा ६ | पतञ्जलिगुरुकुलम्, योगग्राम:, हरिद्वारम् (उ.ख.) | प्रथमम् |
| **दीक्षा** | कक्षा ६ | पतञ्जलिगुरुकुलम्, मूल्याग्राम: देवप्रयाग: (उ.ख.) | द्वितीयम् |
| **राजकुमार:** | कक्षा ६ | योगग्राम: औरङ्गाबाद: हरिद्वारम् (उ.ख.) | तृतीयम् |
| **हर्षिता** | कक्षा ६ | वैदिककन्यागुरुकुलम्, देहरादूनम् (उ.ख.) | सान्त्वना |
| **मोहितशर्मा** | प्राक्शास्त्रिप्रथमवर्षम् | रा.सं.सं., श्रीरघुनाथकीर्तिपरिसर:, देवप्रयाग: (उ.ख.) | सान्त्वना |
| **३. अष्टाध्यायीकण्ठपाठ:** | | | |
| **भानुप्रताप:** | उत्तरमध्यमाद्वितीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठ-गुरुकुलम्, पौन्धा, देहरादून, (उ.ख.) | प्रथमम् |
| **आशुतोषकाला** | आचार्यद्वितीयवर्षम् | उत्तराखण्ड-संस्कृत-विश्वविद्यालय:, बहादराबाद:, हरिद्वारम् | द्वितीयम् |
| **नारायण:** | कक्षा ६ | योगग्राम:, औरङ्गाबादम्, हरिद्वारम्, (उ.ख.) | तृतीयम् |

| | | | |
|---|---|---|---|
| भावेशश्रोत्रियः | पूर्वमध्यमाप्रथमवर्षम् | श्रीरघुनाथकीर्ति-आदर्शसंस्कृतमहा., देवप्रयागः, पौडीगढवालः, (उ.ख.) | तृतीयम् |
| अंकिता | कक्षा ६ | पतञ्जलिगुरुकुलम्, मूल्याग्रामः, देवप्रयागः, (उ.ख.) | सान्त्वना |
| **४. धातुरूपकण्ठपाठः** | | | |
| सारांशः | शास्त्रितृतीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठ-गुरुकुलम्, पौन्धा, देहरादून, (उ.ख.) | प्रथमम् |
| **५. अमरकोषकण्ठपाठः** | | | |
| कैलाशः | उत्तरमध्यमाद्वितीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठगुरूकुल, पौन्धा, देहरादून, (उ.ख.) | प्रथमम् |
| रामतिवारी | प्राक्शास्त्रिद्वितीयवर्षम् | रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, (उ.ख.) | द्वितीयम् |
| **६. साहित्यभाषणम्** | | | |
| सौरभजोशी | शास्त्रीतृतीयवर्षम् | श्रीभगवानदास-आदर्शसंस्कृतमहा., पो. गुरुकुलकाङ्गडी, हरिद्वारम्, (उ.ख.) | प्रथमम् |
| **७. वेदान्तभाषणम्** | | | |
| अनुरुद्धकुमारत्रिपाठी | आचार्यद्वितीयवर्षम् | रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, (उ.ख.) | प्रथमम् |
| **८. वेदभाष्यभाषणम्** | | | |
| ईश्वरसिंहरावतः | आचार्यप्रथमवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठ-गुरुकुलम्, पौन्धा, देहरादून, (उ.ख.) | प्रथमम् |
| **९. साहित्यशलाका** | | | |
| अभिषेकपरगाँई | आचार्यद्वितीयवर्षम् | श्रीभगवानदास-आदर्शसंस्कृतमहा.,पो. गुरुकुलकाङ्गडी, हरिद्वारम्, (उ.ख.) | प्रथमम् |
| **१०. व्याकरणशलाका** | | | |
| श्यामदेवः | शास्त्रीतृतीयवर्षम् | रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, (उ.ख.) | प्रथमम् |
| **११. पुराणेतिहासशलाकापरीक्षा** | | | |
| लवसेमवालः | आचार्यद्वितीयवर्षम् | श्रीभगवानदास-आदर्शसंस्कृतमहा.,पो. गुरुकुलकाङ्गडी, हरिद्वारम्, (उ.ख.) | प्रथमम् |
| **१२. शास्त्रीयस्फूर्तिस्पर्धा** | | | |
| १. किशोरकुमारः<br>२. हरिश्चन्द्रडङ्गवालः | शोधच्छात्रः | रा.सं.सं., श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, (उ.ख.) | प्रथमम् |
| १. जसुदेवः<br>२. अनिलभट्टः | आचार्यद्वितीयवर्षम्<br>शास्त्रीतृतीयवर्षम् | श्रीभगवानदास-आदर्शसंस्कृतमहा., गुरुकुलकाङ्गडी, हरिद्वारम्, (उ.ख.) | द्वितीयम् |
| १. ईश्वरसिंहरावतः<br>२. सारांशः | आचार्यप्रथमवर्षम्<br>शास्त्रितृतीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठगुरुकुल, पौन्धा, देहरादून, (उ.ख.) | तृतीयम् |
| **१३. अन्त्याक्षरीस्पर्धा** | | | |
| सत्यप्रकाशः | शास्त्रितृतीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठगुरूकुल, पौन्धा, देहरादून, (उ.ख.) | प्रथमम् |
| अनिलभट्टः | शास्त्रीतृतीयवर्षम् | श्रीभगवानदास-आदर्शसंस्कृत महा., पो. गुरुकुलकाङ्गडी, हरिद्वारम्, (उ.ख.) | द्वितीयम् |
| **१४. समस्यापूर्तिः** | | | |
| कैलाशः | उत्तरमध्यमाद्वितीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठ-गुरुकुलम्, पौन्धा, देहरादून, (उ.ख.) | प्रथमम् |
| सारांशः | शास्त्रितृतीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठ-गुरुकुलम्, पौन्धा, देहरादून, (उ.ख.) | द्वितीयम् |
| सत्यप्रकाशः | शास्त्रितृतीयवर्षम् | श्रीमद्दयानन्द-आर्षज्योतिर्मठ-गुरुकुलम्, पौन्धा, देहरादून, (उ.ख.) | तृतीयम् |
| **१५. शास्त्रार्थविचारः** | | | |
| किशोरकुमारः | शोधच्छात्रः | रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, (उ.ख.) | प्रथमम् |
| हरिश्चन्द्रडङ्गवालः | शोधच्छात्रः | रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, (उ.ख.) | द्वितीयम् |

## उत्तराखण्ड-संस्कृत-शिक्षक-सम्मेलनम्

भारतभूभागस्य हिमालयक्षेत्रीय-राज्येषु उत्तराखण्डराज्यम् अन्यतमं वर्तते, यस्य पूर्वनाम उत्तराञ्चलम् आसीत्। उत्तरभारते स्थितस्यास्य राज्यस्य स्थापना इदम्प्रथमतया ९ नवम्बर, २००० तमे दिनाङ्के भारतवर्षस्य सप्तविंशतितमराज्यरूपेणाभूत्। ततः पूर्वमेतद् उत्तरप्रदेशस्य अविभाज्यम् अङ्गमासीत्। २००० तमवर्षादारभ्य २००६ तमवर्षं यावदस्य राज्यस्य नाम उत्तराञ्चलमासीत्। २००७ तमे वर्षे चास्य राज्यस्य आधिकारिकं नामकरणम् 'उत्तराखण्डः' इति सञ्जातम् ।



उत्तराखण्डसंस्कृतशिक्षकसम्मेलनस्य किञ्चन दृश्यम्

उत्तराखण्डविषये पुराणेष्वपि यत्र तत्र महत्त्वपूर्णाः उल्लेखाः प्राप्यन्ते। स्कन्दपुराणे अस्य प्रदेशस्य विभागद्वयं निर्दिष्टम्-केदारखण्डः मानसखण्डश्च। केदारखण्डः सम्प्रति गढवालनाम्ना, मानसश्च कुमाऊँनाम्ना प्रसिद्धः। एवमस्य उत्तराखण्डराज्यस्य महती ऐतिहासिकी (पौराणिकी), भौगोलिकी, सांस्कृतिकी साहित्यिकी च पृष्ठभूमिः वर्तते।


राज्यस्तरीयशास्त्रीयस्पर्धायाः पुरस्कारवितरणस्य किञ्चन दृश्यम्

भागीरथी गङ्गेव उत्तराखण्डे संस्कृतभाषा-साहित्यपरम्परा प्राचीन-कालादेव प्रवहमाना अस्ति। उत्तराखण्डस्य संस्कृत-परम्परया सामान्यतया विद्वांसः परिचिताः न सन्ति। अथवा विरला एव जनाः तत्परम्परया परिचिताः सन्ति। अतः यथा समेऽपि ते संस्कृतानुरागिणः, विद्यार्थिनः, शोधार्थिनः, विद्वांसश्च अनया उत्तराखण्डस्य संस्कृत-परम्परया सम्यक्तया परिचिताः स्युः, यथा च उत्तराखण्डस्य संस्कृत-परम्परायाः सम्यग् विकासो भवेत्, तदर्थं परिसरे १७.११.२०१८ तमे दिनाङ्के उत्तराखण्ड-संस्कृत-शिक्षक-सम्मेलनमायोजितम्।

परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडु-महोदयस्य आध्यक्ष्ये सम्पन्नेऽस्मिन् उद्घाटन-समारोहे संस्कृतभारत्याः क्षेत्रीयसंगठनमन्त्री श्रीप्रतापसिंहः मुख्यातिथिरूपेण, डा. शैलेशतिवारी च विशिष्टातिथिरूपेण उपस्थितान् उत्तराखण्ड-संस्कृत-शिक्षकान् उदबोधयताम्।

## सुसम्पन्नः संस्कृत-सम्भाषण-लेखनानुवादप्रशिक्षणवर्गः

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे अक्तूबरमासस्य २० तः २२ दिनाङ्कपर्यन्तम् त्रिदिवसीयः संस्कृत-सम्भाषण-लेखनानुवादप्रशिक्षणवर्गः समचाल्यत। अस्मिन् वर्गे उत्तराखण्डराज्यस्य विविधास्थानेभ्यः समागताः ५ शोधच्छात्राः, श्रीरघुनाथ-कीर्तिपरिसरस्य च ८ छात्राः, एवमाहत्य १३ प्रतिभागिनः भागम् अगृह्णन्। वर्गेऽस्मिन् प्रातः ९ वादनादारभ्य सायं ६ वादनपर्यन्तं विविधेषु सत्रेषु प्रत्यक्षविधिना सम्भाषणाभ्यासः, भाषाशुद्ध्यर्थं व्याकरणाभ्यासः, क्रीडाद्वारा भाषाभ्यासः, कथालेखनाभ्यासः विशिष्य च अनुवादस्य अभ्यासाः विहिताः।


संस्कृतसम्भाषणलेखनानुवादप्रशिक्षणवर्गे भाषमाणः परिसरप्राचार्यः

वर्गस्यास्य समापनकार्यक्रमः अक्तूबरमासस्य २२ दिनाङ्के प्रवृत्तः, यत्र मुख्यातिथित्वेन परिसरस्यास्य व्याकरणविभागाध्यक्षः आचार्यः बनमाली-बिश्वालमहोदयः उद्बोधनमकरोत्। स च महोदयः आधुनिकसंस्कृत-साहित्यविषये विविधप्रकारकलेखनस्य नूतनायामानाञ्च विषये सर्वान् वर्गार्थिनः उद्बोधितवान्। कार्यक्रमस्यास्य अध्यक्षपदमलमकरोत् परिसरप्राचार्यः आचार्यः के.बी. सुब्बरायुडुवर्यः, येन देवप्रयागनगरं संस्कृतमयं कर्तुं स्वसङ्कल्पः प्रकटीकृतः। एतदवसरे संस्कृतभाषायाः महत्त्वं द्योतयित्वा वर्तमानकाले अस्याः भाषायाः प्रासङ्गिकताम्, एतादृशाणां च वर्गाणाम् आवश्यकतां च निरूपितवन्तः डॉ. आर. बालमुरुग-डॉ. प्रफुल्लगडपालसदृशाः परिसरस्य अन्येऽपि आचार्याः। वर्गस्य प्रतिवेदनं डा. मुकेशशर्मणा प्रस्तुतम्। कार्यक्रमसञ्चालनं च कृतं शोधच्छात्रेण श्रीमता किशोरेण।

अस्मिन्नवसरे समेऽपि प्राध्यापकाः परिसरच्छात्राश्च उपस्थिताः आसन्। अस्य वर्गस्य संयोजकः आसीत् ज्योतिषविभाग-प्राध्यापकः डा. मुकेशकुमारः ।

## आयोक्ष्यन्ते राष्ट्रियाः अन्ताराष्ट्रीयाः च सङ्गोष्ठयः

राष्ट्रिय-संस्कृत-संस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्ति-परिसरे व्याकरण-साहित्य-ज्योतिष-आधुनिक-वेद-वेदान्त-न्याय-शास्त्रीयाः विविध-विभागीया राष्ट्रिय-अन्ताराष्ट्रियसङ्गोष्ठ्यः २८.०१.२०१९ तः २३.०२.२०१९ दिनाङ्कं यावत् प्रवर्तिष्यन्ते।

व्याकरणविभागीया द्विदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी २८.०१.२०१९ तः २९.०१.२०१९ दिनाङ्कं यावत् सङ्कल्पिता। सङ्गोष्ठ्याः केन्द्रीयो विषयो वर्तते : समासशक्तिसिद्धान्ते परावर्तनबिन्दवः (Turning points in the concept of Samasa-shakti)।

साहित्यविभागीया द्विदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी ३०.०१.२०१९ तः ३१.०१.२०१९ दिनाङ्कं यावत् प्रस्ताविता। सङ्गोष्ठ्याः केन्द्रीयो विषयो वर्तते : संस्कृत-साहित्ये बौद्धपरम्परायाः योगदानम् (Contribution of Buddhist tradition to Sanskrit Literature)।

ज्योतिषविभागीया द्विदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी ०१.०२.२०१९ तः ०२.०२.२०१९ दिनाङ्कं यावत् प्रवर्तिष्यते इति निर्णयः गृहीतः। सङ्गोष्ठ्याः मुख्यो विषयो वर्तते : देववास्तुविमर्शः।

आधुनिकविभागीयाद्विदिवसीया राष्ट्रिया सङ्गोष्ठी ०३.०२.२०१९ तः ०४.०२.२०१९ दिनाङ्कं यावत् परिकल्पिता। सङ्गोष्ठ्याः केन्द्रीयो विषयो वर्तते : लोकसंस्कृति का इतिहास से अन्तःसम्बन्ध।

वेदविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी १८.०२.२०१९ तः १९.०१.२०१९ दिनाङ्कं यावत् सङ्कल्पिता। सङ्गोष्ठ्याः प्रतिपाद्यो विषयो वर्तते : वेदेषु देवतावादः।

न्यायविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २०.०२.२०१९ तः २१.०२.२०१९ दिनाङ्कं यावत् प्रस्ताविता। सङ्गोष्ठ्याः मुख्यो विषयो वर्तते : वैशेषिकसूत्रोपस्कारस्थ-विशेषविचाराणां परिशीलनम्।

वेदान्तविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २२.०२.२०१९ तः २३.०२.२०१९ दिनाङ्कं यावत् सुनिश्चिता। सङ्गोष्ठ्याः केन्द्रीयो विषयो वर्तते : मोक्षसाधन-सामग्रीविमर्शः।

## प्रवर्तिष्यन्ते विभागीय-विशिष्ट-व्याख्यानानि

राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्ति-परिसरे वेद-व्याकरण-साहित्य-ज्योतिष-आधुनिक-वेदान्त-शास्त्रीय-विविध-विभागीय-विशिष्टव्याख्यानानि २८.०१.२०१९ तः २३.०२.२०१९ दिनाङ्कं यावत् प्रवर्तिष्यन्ते।

तत्क्रमे व्याकरण-विभागीय-विशिष्टव्याख्यानं २८.०१.२०१९ तमे दिनाङ्के भविता। विशिष्टव्याख्यानस्य विषयो वर्तते : समासवृत्तिविमर्शः।

साहित्यविभागीय-विशिष्टव्याख्यानं ३०.०१.२०१९ तमे दिनाङ्के समायोक्ष्यते। विशिष्टव्याख्यानस्य विषयोऽस्ति : बौद्धसंस्कृतसाहित्ये अनुवादे अर्थनिर्धारणस्य समस्याः सम्भावनाश्च।

ज्योतिष विभागीय-विशिष्टव्याख्यानं ०१.०२.२०१९ तमे दिनाङ्के भविष्यति। विशिष्टव्याख्यानस्य विषयो वर्तते : वास्तुशास्त्रस्य लोकोपयोगित्वम्।

आधुनिक विभागीय-विशिष्टव्याख्यानं ०३.०२.२०१९ तमे दिनाङ्के प्रवर्तिष्यते। विशिष्टव्याख्यानस्य विषयोऽस्ति : संस्कृत और संस्कृत अधयेताओं के भविष्य में कम्प्यूटर का योगदान ।

वेदविभागीय-विशिष्टव्याख्यानं १८.०२.२०१९ तमे दिनाङ्के सुनिश्चितमस्ति। विशिष्टव्याख्यानस्य विषयो भवति : वेदस्य परमं प्रतिपाद्यम्।

वेदान्त-विभागीय-विशिष्टव्याख्यानं २२.०२.२०१९ तमे दिनाङ्के प्रवर्तिष्यते। विशिष्टव्याख्यानस्य विषयो वर्तते : ज्ञानकर्मसमुच्चयविचाराः।

## आयोजितः परिसरे सतर्कताजागरूकतासप्ताहः



सतर्कताजागरूकतासप्ताहस्य किञ्चन दृश्यम्

परिसरे २९-१०-२०१८ दिनाङ्कात् ३-११-२०१८ दिनाङ्कं यावत् सतर्कता-जागरूकता-सप्ताहः विधिवत् पालितः।

परिसरप्राचार्यस्य प्रो.के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये सम्पन्नेऽस्मिन् उद्घाटनकार्यक्रमे संयोजकेन परिसरस्य व्याकरणविभागाध्यक्षेन प्रो. बनमाली-बिश्वालेन स्वागतभाषणं प्रस्तुतम्। तदनु मुख्यातिथिरूपेण श्री के.एस. राठौरः (इन्स्पेक्टर, देवप्रयागः) तथा विशिष्टातिथिरूपेण (सब इन्स्पेक्टर, देवप्रयागः) सभामुद्बोधितवन्तौ। कार्यक्रमेऽस्मिन् धन्यवादज्ञापनं डा. प्रफुल्लगडपालेन कृतम्। अस्य कार्यक्रमस्य सञ्चालनं शोधच्छात्रेण श्रीहरीशडङ्गवालेन कृतम्। अन्ते च सर्वैः एतत्सम्बद्धः शपथपाठः विहितः। अस्मिन्नवसरे श्रीरघुनाथवार्तावल्याः अष्टमाङ्कः लोकायार्पितः।

## समायोजितः एकतासप्ताहः



एकतासप्ताहकार्यक्रमस्य किञ्चन दृश्यम्

सरदार-बल्लभभाईपटेल-जयन्तीमभिलक्ष्य ३१.१०.२०१९ दिनाङ्कात् ६.११.२०१९ दिनाङ्कं यावद् राष्ट्रिय-एकता-सप्ताहः समायोजितः। तत्क्रमे ३१-१०-२०१८ तमे दिनाङ्के आयोजिते उद्घाटनसत्रे श्रीमोहनजोशी (संघ-जिलाप्रचारकः) मुख्यातिथि-रूपेण उदबोधयत्। विशिष्टातिथिरूपेण काशीहिन्दू-विश्वविद्यालयस्य व्याकरण-विभागाध्यक्षः प्रो. भगवच्छरणशुक्लः सभामुद्बोधितवान्।

परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य आध्यक्षे सम्पन्नेऽस्मिन् कार्यक्रमे संयोजकेन परिसरस्य व्याकरणविभागाध्यक्षेन प्रो. बनमालीबिश्वालेन स्वागतभाषणं प्रस्तुतम्। अस्मिन् कार्यक्रमे धन्यवादज्ञापनं श्रीपङ्कजकोटियालेन विहितम्। अस्य कार्यक्रमस्य सञ्चालनं च श्रीविजेन्द्रबिष्टेन कृतम्।

## गान्धीजयन्ती स्वच्छभारत-अभियानं च


स्वच्छभारत-अभियाने स्वच्छतां कुर्वन्तः परिसरच्छात्राः

विश्वविद्यालयानुदानायोगस्य भारतशासन-मानवसंसाधनविकासमन्त्रालयस्य च निर्देशानुसारेण परिसरे गान्धीजयन्ती स्वच्छभारत-अभियानं च विहितम्। तत्क्रमे २९.१०-२०१८ तमे दिनाङ्के गान्धीजयन्त्यवसरे परिसरप्राचार्यप्रमुखैः परिसरीयछात्रैः प्राध्यापकैश्च परिसरप्राङ्गणं परिसर-भवनञ्च स्वच्छीकृतम्।

वस्तुतः 'स्वच्छता हि सेवा' इति मूलमन्त्रमङ्गीकृत्य सर्वैः समूहरूपेणात्र योगदानं कृतम्।

अन्ते च, सामूहिकरूपेण प्राध्यापकैः छात्रैश्च 'वैष्णव जन तो तेने कहिये' इति भजनं ससङ्गीतं सस्वरं च प्रस्तुतम्।

## परिसरे आयोजिताः सत्रार्द्ध-परीक्षाः

०८.१२.१८ दिनाङ्कात् २५.१२.१८ दिनाङ्कं यावत् परिसरे सर्वविधाः सत्रार्द्ध-परीक्षाः सुसम्पन्नाः। शास्त्रि-आचार्य-कक्ष्यासु अधीयानाः छात्राः साहित्य-व्याकरण-वेद-वेदान्त-ज्यौतिष-न्यायादिविषयेषु स्व-स्व-परीक्षापत्राणि लिखितवन्तः। प्राक्शास्त्रि-छात्राणामपि अर्द्धवार्षिकी परीक्षा एतदवधौ समायोजिता।

सर्वाश्च परीक्षाः सुचारुतया सम्पन्नाः इत्येतदर्थं केन्द्राध्यक्षः परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः हर्षमनुभवन् समेभ्यः परिसरप्राध्यापकेभ्यः छात्रेभ्यश्च धन्यवादान् प्रायच्छत्।

# रामकरणशर्म-विरचितस्य 'सीमा'ख्यस्य संस्कृतोपन्यासस्य वैचारिकं परिदृश्यम्

-प्रो. बनमाली बिश्वाल:

विंशतिशताब्देरुत्तरार्धे रामकरणशर्मणा विरचितयो: आधुनिकभावबोध-संवलितयो: 'सीमा'-'रयीश:' इति शीर्षकाङ्कितयो: चर्चितयो: प्रतिष्ठितयोश्च द्वयो: संस्कृतोपन्यासयो: आधुनिकसंस्कृत-गद्यसाहित्ये महत्त्वपूर्णं स्थानं वर्तते। एतयोरत्र 'सीमा'-नामानम् उपन्यासमधिकृत्य संक्षिप्त: विचार: प्रस्तूयते। देश-प्रदेश-सीमासु प्रवर्तितै: पारस्परिकविवादै: प्रेरित: सन् सम्भवत: लेखकेन अयमुपन्यासो विरचित:। उपन्यासोऽयं सप्त खण्डै: विभक्तोऽस्ति। परन्तु खण्डानामत्र शीर्षकाणि नैव प्रदत्तानि सन्ति। अपितु तत्र केवलं संख्यया खण्डविभाजनं प्रस्तुतमस्ति।

राष्ट्रप्रेम-लोककल्याणमाधृत्य एवञ्च पञ्च लघु-राज्यानां सम्प्रभुतापरक-एकीकरणञ्च आधृत्य लिखितेऽस्मिन् उपन्यासे लेखकेन स्वकीयाद्भुत-वर्णन-कौशलेन, कल्पनाचारुतया प्रस्तुतीकरणेन, परिस्थितीनां स्वाभाविकाङ्कनेन, दशा-अन्तर्दशानां समुचितसंयोजनेन च संस्कृतोपन्यासपरम्परायां काचित् महत्त्वपूर्णा चोपलब्धि: संयोजिता।

राज्यानामेकीकरण-सन्दर्भे संहारक-विघटनात्मक-शक्तीनां विश्लेषणं प्रस्तुवतश्चास्य उपन्यासस्य कथानके कस्यचित् काल्पनिक-युग-विशेषस्य तथा सम्पूर्णस्य राजनैतिक-राष्ट्रिय-जीवनस्य च उद्घाटनं वर्तते। अत्र राष्ट्रिय-संस्कृते: तथा सभ्यतायाश्च उत्कर्षाधायकतत्त्वै: सहैव राजनैतिक-सामाजिक-दुरवस्थानां कारणान्वेषण-प्रयत्न: अप्यन्तर्भूत:।

अयञ्चोपन्यास एक बहुआयामि-राजनैतिक-कथानकोपरि प्रतिष्ठित:, यस्य मुख्यकेन्द्रे आश्रम-संस्कृति: विराजते। अत्र राजनैतिक-सामाजिक-संघर्षाणां मध्ये पात्राणाम् उदात्त-चारित्रिक-भूमि: प्रतिष्ठापिता। वस्तुत: राष्ट्रीयचेतनैव उपन्यासस्य मुख्य-स्वरोऽस्ति। राष्ट्रिय-उत्कर्षस्य संस्कार: उपन्यासस्य प्रत्येकपक्षे समाविष्ट:। अत: अयमुपन्यास: राष्ट्रियजीवनस्य आदर्शस्य च प्रतिबिम्ब: कथयितुं शक्यते। राष्ट्रीय-संघर्ष-सामाजिकोत्थानयो: स्वरे चानुगुञ्जितोऽयमुपन्यास: काल्पनिक-राष्ट्रिय-जीवनस्य प्रतिबिम्बरूपेणापि परिलक्षितो भवति।

अस्मिन् उपन्यासे द्वन्द्वात्मक-स्थितीनाम् अङ्कनं पदे पदे द्रष्टुं शक्यते। उपन्यासस्यारम्भ: कस्यचिचौरस्य मानसिक द्वन्द्वादेव भवति। उपन्यासं पठत: पाठकस्य पदे पदे चैषा अनुभूतिर्जायते। लेखक: मानवमनस: परीक्षणे सिद्धहस्त: प्रतीयते। अस्य च प्रमाणं प्रारम्भादेवोपलभ्यते। एवमत्र कथाया: प्रभावशाली प्रारम्भोऽस्तीति वक्तुं शक्यते। महर्षिद्वारा-प्राप्तस्य धनस्य सन्दर्भे तस्य द्वन्द्व-उहापोह-तर्क-वितर्कै: लेखकेन सहजतया स्वीयाभिव्यक्ति: प्रकटीकृता-'किममुना कुर्याम्? कुत्र यायाम्? कथं वा कुत्र वा गोपयेयं स्वर्णराशिमिमम्। अथवा गत्वां राजकुलं स्वयमेव समर्पयामि सर्वमिदं स्वर्णं राज्ञे, प्राप्नोमि च पुरस्कारमाजीविकां च। तत: परमहमपि शिष्टजने च वर्तिष्ये। (पृ. ०१)

उपन्यासस्य कथावस्तुनि सर्वत्र प्रेम्ण: परिमार्जितं मर्यादितम् उदात्तं च रूपं द्रष्टुं शक्यते। मालती, राधा तथा कमला-एतास्तिस्रो महिला: पति-वियोगम् असहनीयं मत्त्वा महर्षे: राजव्यवस्थायां प्रश्नचिह्नम् अङ्कयन्ति। मालती कथयति-'वियुज्य पत्युर्नाहमात्मानमपि शासितुं प्रभविष्यामि, का कथा समस्तवारूणावसुधा-सञ्चालनस्य।' (पृ. १०४)

कौबेर-राज्यस्य दुरवस्था, स्वपुत्रस्य राजकुमारस्य स्वकीयम् उत्तरदायित्वं प्रति उपेक्षाभाव:, भोग-लिप्सां प्रति तस्य विशेषासक्तिं च दृष्ट्वा राज्ञ: लोकनाथस्य दीर्घकथने तस्य बुद्धिमत्ता, राज्ञ: कर्तव्यानां दिशा-निर्देशनं तथा राज्यस्य दुरवस्थाया: मूलकारणं द्योतितं भवति। तत्र ते चेत्थं प्रबोधयन्ति-'धिक् त्वां, धिक् ते कौबेराध्यक्षपदभाजनम् अपि प्रवेशयिष्यसि दशाधिककोटिमितां जनतामन्तर्दुर्गद्वारम्। तर्हि त्वं ज्ञास्यसि को राजभक्त: को वा राजद्रोही'ति। ... (पृ. ७२)

स्वपुत्रस्य प्राशासनिक्या अयोग्यतया तथा अकर्मण्यतया च हताशस्य, दु:खिन: तथा क्रुद्धस्य पितु: प्रतिक्रिया-व्यक्तीकरणे लेखकेन श्रेष्ठा सफलता सम्प्राप्ता-'कस्ते तात:, का ते माता, कस्तव: गुरु:। कश्च सुरस्ते? त्वमसि त्वमेव। अहमिदानीं प्रष्टुमिच्छामि राजानं कौबेरदेशस्य ... (पृ. ७१)

अत्र च प्रस्तुतोपन्यासे सौर-ज्ञान-विज्ञानयो: प्रभाव:, महत्त्वं, हस्तान्तरणे सावधानता तथा जनहिते प्रयोगाणां प्रशस्यं वर्णनमस्ति। आसन्नप्रसवा राधा च ऐन्द्रदेशे एव निवासं कुर्वती सौर-विज्ञानस्य प्रभावात् पीडारहिता सती बुद्धि-बल-मेधा-दीर्घायु-भक्ति- शक्ति-सौभाग्ययुक्तं शिशुम् अरूणं प्रसूते। सौरविज्ञानस्य प्रभावात् केषुचित् मार्मिक-स्थलेषु मूर्छितानां पात्राणां शीघ्रतया लाभदायकोपचार: क्रियते। कुलमातु: मार्गे परिश्रमादुत्पन्नाया: क्लान्तताया: अपनोदनमपि एतन्माध्यमेन क्रियते। एतद्विज्ञान-प्रभावेण ऐन्द्रदेशे निर्मितम् आश्रमं महर्षि: मक्षिकारहितं कर्तुमिच्छति। सौररथ-माध्यमेनैव मदनिका तथा राजकुमार: दुर्ग-वासवश्च देशेषु संस्कृति-संस्कारयो: प्रसार-कार्यं सुचारुरूपेण सम्पादयितुमर्हत:। सौररथेनैव मालती सौर-विज्ञानाचार्यस्य पत्नीम् अत्यन्तशीघ्रताभि: आनीय उपस्थिता भवति।

एवमयमुपन्यास: सामाजिक-पारिवारिक-राजनैतिक-परिवेशानां सूक्ष्मतायै स्वकथाप्रवाहेन कुशलामभिव्यक्तिं प्रददाति। वर्तमान-राजनैतिक-भ्रष्टाचार-दुर्नीति-अराजकतामध्ये अयम् उपन्यास: सौहार्द-सौन्दर्यपरक-राजनैतिक-पृष्ठभूमे: सुखदम् अनुभवं कारयित्वा आशाया बीजमंकुरयितुं समर्थोऽस्ति। वस्तुत: अत्र सांस्कृतिक-नैतिक-आध्यात्मिक-शक्तीनां महत्त्वपूर्णा भूमिका तु लोकशान्ति-लोकहित-कामनानां सन्देशे निहिताऽस्ति।

सीमा (संस्कृतोपन्यास: - लेखक: आचार्य: रामकरण शर्मा, प्रतिभाप्रकाशनम्, 7259/23, प्रेमनगरं, शक्तिनगरं, नवदिल्ली-०७



## प्राचार्यदैनन्दिनी

०९.१०.१८ देहरादूनस्थ-विधानसभाभवने कार्यालयीयोपवेशने भागग्रहणम्।

२९.१०.१८ परिसरीय-सतर्कतादिवसकार्यक्रमे अध्यक्षीयम् उद्बोधनम्।

३१.१०.१८ परिसरीय-एकतादिवसकार्यक्रमे अध्यक्षीयम् उद्बोधनम्।

३०.११.१८ मुख्यालये समुपस्थाय उपवेशने भागग्रहणम्।

## परिसरीय-विदुषां शैक्षिकोपलब्धयः गतिविधयश्च

### १. प्रो. बनमाली बिश्वालः

- १०.१०.२०१८ दिनाङ्कात् ११.१०.२०१८ दिनाङ्कं यावद् कोलकतास्थे नरेन्द्रपुरे रामकृष्णा-आवासीय-महाविद्यालय-साहित्याकादम्योः संयुक्तत्त्वावधाने 'जनभाषा संस्कृतम् भारतीयजनजातयश्च' इति विषयमधिकृत्य आयोजितायां द्विदिनात्मिकायां राष्ट्रियसंगोष्ठ्यां उद्घाटनसत्रे बीजभाषणं प्रस्तुतवान्। तत्र च राष्ट्रिय-कथावाचनसत्रे कथावाचनं कृतवान्।
- २०.११.२०१८ दिनाङ्कात् २४.११.२०१८ दिनाङ्कं यावत् केरलस्थे चिन्मय-इंटरनेशनल-फाउंडेशन-शोधसंस्थाने पाण्डुलिपिविज्ञान-विषयिण्यां राष्ट्रिय-कार्यशालायाम् आधारपुरुषरूपेण सप्त व्याख्यानानि प्रस्तुतवान्।
- ०१.१२.२०१८ दिनाङ्कात् ०२.१२.२०१८ दिनाङ्कं यावद् भोपालस्थे राष्ट्रिय-संस्कृतसंस्थान-परिसरे वीणापाणि-संस्कृत-परिषत्साहित्याकादम्योः संयुक्तत्त्वावधाने आचार्य बच्चूलाल अवस्थी – आधुनिकं साहित्यम् अधिकृत्य आयोजितायाम् द्विदिवसीयायां राष्ट्रियसंगोष्ठ्यां विशिष्टसत्रे अध्यक्षीयं भाषणं प्रस्तुतवान् तथा आचार्यबच्चूलाल-अवस्थिनः काव्येषु अन्यच्छाया-सौन्दर्यम् इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। तत्र च ०२.१२.२०१८ दिनाङ्के समायोजिते राष्ट्रिय-कविसम्मेलने काव्यपाठः प्रस्तुतः।
- एतदवधौ कथासरित्-पत्रिकायाः सप्तविंशाङ्कस्य सम्पादनं कृतवान्। तत्र च एतस्य काश्चन मौलिक्यः अनूदिताश्च कथाः प्रकाशिताः अभवन्।
- एतदवधौ पद्यबन्धाया द्वादशाङ्कस्य मुख्यसम्पादकरूपेण सम्पादनं कृतवान्। तत्र च एतस्य काश्चन मौलिक्यः अनूदिताश्च कविताः प्रकाशिताः अभवन्।
- एतदवधौ प्रयागस्थे राष्ट्रियसंस्कृतसंस्थानाङ्गभूते श्रीगङ्गानाथझापरिसरे मन्मार्गदर्शने द्वौ शोधच्छात्रौ शोधप्रबन्धौ प्रस्तुतवन्तौ।
- एतदवधौ उत्कलविश्वविद्यालयस्य दिल्ली-विश्वविद्यालयस्य च द्वयोः शोधप्रबन्धयोः बाह्यपरीक्षकरूपेण मूल्याङ्कनं कृतवान्।
- सेप्टेम्बर-अक्टूबरमासयोः गोरखपुर-विश्वविद्यालये एकस्य शोधच्छात्रस्य बाह्यपरीक्षकरूपेण वाक्परीक्षां गृहीतवान्।

### २. डॉ. कृपाशङ्करशर्मा–

- अगरतलापरिसरात् स्थानान्तरणात्परं ०८.१०.१८ दिनाङ्के परिसरे साहित्यविभागे कार्यभारग्रहणम्।
- ०१.१२.२०१८ दिनाङ्कात् ०२.१२.२०१८ दिनाङ्कं यावद् भोपालपरिसरे वीणापाणि-संस्कृत-परिषत्साहित्याकादम्योः संयुक्तत्त्वावधाने 'आचार्यबच्चूलाल-अवस्थी : आधुनिकं साहित्यम्' अधिकृत्य आयोजितायाम् द्विदिवसीयायां राष्ट्रियसंगोष्ठ्यां शोधपत्रं प्रस्तुतम्।

### ३. डॉ. प्रफुल्लगडपालः–

- राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे १५-११-२०१८ तः १७-११-२०१८ दिनाङ्कं यावत् आयोजितायां राज्यस्तरीय-शास्त्रीय-स्पर्धायां सहसंयोजकदायित्वं निर्व्यूढम्।
- राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे १७.११.२०१८ तमे दिनाङ्के समायोजिते उत्तराखण्ड-संस्कृत-शिक्षक-सम्मेलने सहसंयोजकदायित्वं निर्व्यूढम्।
- परिसरीया साहित्यविभागस्य 'बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकः सन्देशः' इत्यभिधाना बौद्धमिश्रितसंस्कृतसाहित्यविशेषाङ्कपरा साहिती इति पत्रिका सम्पादिता। 'पालि-संवादो' इति विश्वस्य प्रथमायाः पालि-पत्रिकायाः प्रवेशाङ्कः सम्पादितः।

## स्नानयात्रा-समारम्भा रथयात्रा महीयते

-प्रो. बनमालीबिश्वालः

मध्याह्ने ज्येष्ठमासस्य शुभायां पूर्णिमातिथौ।
जगन्नाथप्रभोर्दीव्या स्नानयात्रा प्रसिद्ध्यति।१।
शीतयितुं तनोस्तापान् भ्रात्रा स्वस्रा महाप्रभुः।
मन्दिराद्बहिरागत्य भक्तानाशीः प्रयच्छति।२।
शिरसि टाहिआं (किरीटं) धृत्वा स्वेदबिन्दून् मुखे वहन्।
सुसम्पाद्य पहण्डिं स राजते स्नानमण्डपे।३।
समक्षं शीतलादेव्याः प्रभवो घर्मपीडिताः।
पश्यन्ति शीतलाकूपं स्वर्णकूपापराभिधम्।४।
नदीभिर्बहुभिर्यत्र समुद्रोऽन्तस्समाहितः।
पाताल-गङ्गया योगात् कूपेऽपि प्रवहज्जलम्।५।
शीतजल-प्रतीक्षायां सन्तापो वर्धते तनौ।
कर्पूरचन्दनैर्युक्ते दिव्ये गन्धजले रतिः।६।
रजत-मृत्तिकोत्पन्नैरष्टोत्तरशतं घटैः।
चतुर्धा मूर्तयस्स्नाताः सेवकैर्नियतैश्च कैः।७।
अनुलिप्तास्ततो देवाः प्रोञ्छनान्मार्जनात्परम्।
दिव्याभूषणसंयुक्ताः भक्तान्स्वदर्शनं ददुः।८।
कर्णाटक-प्रदेशीयः भक्तः प्रियम्वदाभिधः।
अभीष्टवान्जगन्नाथे द्रष्टुं गणेशविग्रहम्।९।
स्वेष्टदेवमदृष्ट्वाऽसौ स्नानमण्डपमूर्तिषु।
आसीन्निवर्तमानो हा स्वदेशं विगतस्पृहः।१०।
भावग्राही जगन्नाथो ज्ञातवांस्तन्मनोवार्ताम्।
अचिरात्प्रकटीभूतः गणेशवेषपूर्वकः।११।
गजाननयुतं वेषं धृतवन्तौ सहोदरौ।।
शक्तिस्वरूपिणी स्वसा कुमारी-विग्रहे स्थिता।१२।
शैव-वैष्णव-शाक्तांश्च तोषयितुं दृढव्रताः।
भक्तवाञ्छानुरूपं हि नवान्वेषान्धरन्ति ते ।१३।
स्नानेन च ज्वराक्रन्ताः मानवीयगुणैर्युताः।
देवाश्चिकित्सकाधीनाः अणसरगृहे स्थिताः।१४।
अलारनाथरूपेण ब्रह्मगिरिपुरौ तदा।
नारायणस्वरूपेण जगन्नाथः समर्च्यते।१५।
चिकित्सां महतीं प्राप्य चायुर्विज्ञानसम्मताम्।
पञ्चदशदिनैः स्वस्थाः देवाः लीलापरायणाः।१६।



नेत्रोत्सवदिने सर्वे सम्प्राप्य नवयौवनम्।
मातृस्वसृगृहं गन्तुं देवाः समुत्सुकाश्च ते।१७।
आषाढस्य द्वितीयायां शुक्लपक्षे शुभेऽहनि।
पहण्डिविधिना देवा मुदा यान्ति रथान् प्रति।१८।
कृष्ण-पीतमये दिव्ये गरुडे शिखरारूढे।
नन्दीघोषे जगन्नाथो कृष्णहस्ती विराजते।१९।
नील-रक्तमये भव्ये ताड-वृक्ष-समङ्किते।
तालध्वजरथारूढो बलभद्रस्तदग्रजः।२०।
कृष्ण-रक्त-मयेऽन्यस्मिंश्चार्जुने सारथीकृते।
सुभद्रा राजते मध्ये दर्पदलनसंज्ञिते।२१।
स्वयं गजपतिर्यत्र सेवाकार्ये नियोजितः।
स्वर्णसम्मार्जनीं नीत्वा स्वच्छीकर्तुं रथांश्च तान्।२२।
घण्टामर्दल-नादैस्ते सुभक्तैः परिवेष्टिताः।।
यान्ति देवाः रथारूढाः गुण्डिचामन्दिरं प्रति।२३।
विश्रम्यन्ति रथाः सर्वे मध्येमार्गं स्थलद्वये।
एकत्र वन्दनं कर्तुमन्यत्राप्तुं समर्चनम्।२४।
माउसी-मन्दिरे चादौ पुण्ये सम्मर्दकेऽध्वनि।
स्थगयन्ति रथान्देवास्तद्वन्दनसमीहया।२५।
बलगण्डी-समीपेऽथ रथानां स्थगनं पुनः।
बली राजा रथान् यत्र प्रणमति सभक्तिकम्।२६।
तिष्ठत्येकां रथे रात्रिं कर्तुं भक्तैः सुसम्वादम्।
मन्दिरे मातृस्वसुश्च द्वितीयेऽह्नि सुभोजनम्।२७।
दुःखितैकाकिनी लक्ष्मी हेराख्य-पञ्चमीतिथौ।
गुण्डिचामन्दिरं प्राप्य ताडयति रथान् भृशम्।२८।
एकादशीं रथे कृत्वा स्वर्णवेषेन तोषिताः।
द्वादश्यां वाहुडायान्ते चायान्ति मन्दिरं पुनः।२९।
माता लक्ष्मी सिंहद्वारे कोपान्मार्गमृणद्धि हा।
मानभङ्गात्परं देवः प्राप्नोति रत्नवेदिकाम्।३०।
दैवीं लीलामपूर्वान्तां लोकेषु विरलां त्रिषु।
देवा लालायिता द्रष्टुं यात्रा-त्रय-समन्विताम्।३१।
स्नानयात्रा-समारम्भा घोषयात्रा-सुमध्यमा।
बाहुडान्ता त्रियात्रैषा रथयात्रा महीयते।३२।



## दिनचर्या
(Routine)

अंग्रेजीमूलम्-प्रो. सुशीलकुमारशर्मा
संस्कृतानुवादः-प्रो. बनमालीबिश्वालः

आसीदेकं नियमितं दिनम्
यथा बहून्यन्यानि च व्यतीतानि ह्यविलोकितानि
यथाऽथवा कस्यचिदज्ञातं मुखं सम्मर्द-विपण्यां
अभिज्ञानहीनमुत मुखं मस्जिदे च भिक्षुकस्यैकस्य
परिचित-मुखान्युत मिलन्ति वा कञ्चित् तदीये च मार्गे।
श्रमिकाणां दृश्यमिवाथवा
भवनानि विनिर्मान्ति चादृश्यपराणि।

अथान्यूनं चिन्तितवानहं प्रतीक्षायामासम्
सुखद-कार्यालयीय-कार्-यान-निमित्तम्
चालकश्च आदौ काहलीं वादयन्
ततो नोदयित्वा चाह्वानघण्टिकां
राजकीयाभिवादनात् पूर्वम्।

मच्छिरासु प्रशिरासु वदन्त्यासीत् अनन्त-प्रतीक्षा
सीतयाऽनुभूतं स्याच्च यथा
क्वचित् पुनरशोके चोद्याने
उत पुनर्वाल्मीकेराश्रमे
अथवाऽग्निपरीक्षायाः काले।
चालकोऽपि नैव दृष्टः।
नापेक्ष्यते दर्शनं च तस्य
आसीद्यतः प्रथमदिनाङ्को जुलाई-मासस्य
गृहीतोऽवसरो मया जूनमासस्य त्रिंशत्तारिकायाम्।
पद्भ्याञ्च चलितुं मया निर्णयो गृहीतः
सम्मर्दस्य अंशोऽभवमेवम्
आसीत् परिचयः स एव मदीयः।

It had been a regular day
Like many others that have passed unnoticed
Or, like the unknown face of a person in the crowded market
Or, like the un-recognisable face of a beggar at a mosque
Or, like the familiar faces one meets in one's street
Or, like the sights of the labourers
Raising up buildings unnoticed.

At least so I thought and kept on waiting
For the cosy office car
And the driver first blowing the horn
And then pressing the call bell
Before doing his courtly Salam.

The endless wait was telling on my nerves
Like Sita must have felt
In Ashoka Vatika
Or, in Valmiki's Ashrama
Or, during her Agniparíksha.
The driver did not show up.
He was not to show up.
It was the first of July
And I had retired on the thirtieth of June.
I decided to walk on foot
And become part of the multitude
I had an identity of my own.

## श्रीबदरीशप्रपत्तिः
पं. मुरलीधरशास्त्रिविरचिता

सङ्कलकः-श्रीविनोदपण्डितः, देवप्रयागः

शंखाब्जयचक्रकुलिशध्वजलाञ्छनाढ्यौ
लक्ष्म्याश्रितौ सुरगणैः परिसेव्यमानौ।
अध्यात्मतत्त्वनिगमागमशास्त्रसारौ
पादौ बदर्य्यधिपतेश्शरणं प्रपद्ये।।1।।

ध्येयौ सदामुनिवरैश्च समाधियोगे
ज्ञेयौ तु नारदसनन्दनयोगिवर्य्यैः।
भद्रङ्करौ हि शरणागतपारिजातौ
पादौ बदर्य्यधिपतेश्शरणं प्रपद्ये।।2।।

स्मृत्यौ गजेन्द्रशुकसूतमहानुभावैः
प्रह्लादशौनकध्रुवादिकभक्तसंघैः।
स्तुत्यौ च मत्सरममत्वविकारहीनैः
पादौ बदर्य्यधिपतेश्शरणं प्रपद्ये।।3।।

मोहान्धकारकुहरे विनिपातिताना-
मज्ञाननाशनकरौ सुखदौ सदैव ।
भक्तार्तिहारणपरौ च भवाब्धिपोतौ
पादौ बदर्य्यधिपतेश्शरणं प्रपद्ये।।4।।

रामानुजार्य्यगुरुशङ्करमध्ववर्य्य-
श्रीवल्लभार्य्यनिखिलैरपि शास्त्रविद्भिः।
आचार्यवर्य्यसुनिसेवितमुक्तिभाजौ
पादौ बदर्य्यधिपतेश्शरणं प्रपद्ये।।5।।

इत्थं पदाम्बुजयुगं रघुनाथकस्य
नारायणस्य बदरीवनवासिनञ्च।
विद्वत्सुखाय रचिता मुरलीधरेण
भूयात् सदा सुखकरी हि प्रपत्तिरन्ते।।6।।

# वार्षिकावकाशाः 2019

## राजपत्रितावकाशाः - 2019

### 1940 शकाब्दः

| अवकाशः | दिनाङ्कः | भारतीयतिथिः | वासरः |
|---|---|---|---|
| गणतन्त्र-दिवसः | २६ जनवरी | माघ ०६ | शनिवासरः |
| महाशिवरात्रिः | ०४ मार्च | फाल्गुन १३ | सोमवासरः |
| होली | २१ मार्च | फाल्गुन ३० | गुरुवासरः |

### 1941 शकाब्दः

| | | | |
|---|---|---|---|
| महावीरजयन्ती | १७ अप्रैल | चैत्र २७ | बुधवासरः |
| गुड फ्राईडे | १९ अप्रैल | चैत्र २९ | शुक्रवासरः |
| बुद्धपूर्णिमा | १८ मई | वैशाख २८ | शनिवासरः |
| ईद उल फितर | ०५ जून | ज्येष्ठ १५ | बुधवासरः |
| ईद उल जूहा (बकरीद) | १२ अगस्त | श्रावण २१ | सोमवासरः |
| स्वतन्त्रता-दिवसः | १५ अगस्त | श्रावण २४ | गुरुवासरः |
| जन्माष्टमी | २४ अगस्त | भाद्रपद ०२ | शनिवासरः |
| मुहर्रम | १० सितम्बर | भाद्रपद १९ | मङ्गलवासरः |
| गाँधीजयन्ती | ०२ अक्टूबर | आश्विन १० | बुधवासरः |
| दशहरा | ०८ अक्टूम्बर | आश्विन १६ | मङ्गलवासरः |
| दीपावली | २७ अक्टूबर | कार्तिक ०५ | रविवासरः |
| मैद-उन-नबी (ईद-ए-मिलाद) | १० नवम्बर | कार्तिक १९ | रविवासरः |
| गुरुनानकजयन्ती | १२ नवम्बर | कार्तिक २१ | मङ्गलवासरः |
| क्रिसमस | २५ दिसम्बर | पौष ०४ | बुधवासरः |

## प्रतिबन्धितावकाशाः - 2019

### 1940 शकाब्दः

| | | | |
|---|---|---|---|
| होलिका-दहनम् | २० मार्च | फाल्गुन २९ | बुधवासरः |
| डाल-यात्रा | २१ मार्च | फाल्गुन ३० | गुरुवासरः |
| हजरत अली जयन्ती | २१ मार्च | फाल्गुन ३० | गुरुवासरः |

### 1941 शकाब्दः

| | | | |
|---|---|---|---|
| चैत्र-शुक्लादि/ गुडी-पाडवा/युगादि | ०६ अप्रैल | चैत्र १६ | शनिवासरः |
| रामनवमी (स्मार्त) | १३ अप्रैल | चैत्र २३ | शनिवासरः |
| वैशाखी | १४ अप्रैल | चैत्र २४ | रविवासरः |
| वैशाखी (बङ्गाल)/ बहाग बीहू (आसाम) | १५ अप्रैल | चैत्र २५ | सोमवासरः |
| ईस्टर रविवार: | २१ अप्रैल | वैशाख ०१ | रविवासरः |
| गुरु-रविन्द्रनाथ-जयन्ती | ०९ मई | वैशाख १९ | गुरुवासरः |
| जामात-उल्-विदा | ३१ मई | ज्येष्ठ १० | शुक्रवासरः |
| रथयात्रा | ०४ जुलाई | आषाढ १३ | गुरुवासरः |
| रक्षाबन्धनम् | १५ अगस्त | श्रावण २४ | गुरुवासरः |
| फारसी-नववर्षम् | १७ अगस्त | श्रावण २६ | शनिवासरः |
| गणेशचतुर्थी | ०२ सितम्बर | भाद्रपद ११ | सोमवासरः |
| ओणम (तिरुओणमदिवसः) | ११ सितम्बर | भाद्रपद २० | बुधवासरः |
| दशहरा (महासप्तमी) | ०५ अक्टूबर | आश्विन १३ | शनिवासरः |
| दशहरा (महाअष्टमी) | ०६ अक्टूबर | आश्विन १४ | रविवासरः |
| दशहरा (महानवमी) | ०७ अक्टूबर | आश्विन १५ | सोमवासरः |
| महर्षि-वाल्मीकि-जयन्ती | १३ अक्टूबर | आश्विन २१ | रविवासरः |
| कर्कचतुर्थी (करवाचौथ) | १७ अक्टूबर | आश्विन २५ | गुरुवासरः |
| नरक-चतुर्दशी | २७ अक्टूबर | कार्तिक ०५ | रविवासरः |
| गोर्वधन-पूजा | २८ अक्टूबर | कार्तिक ०६ | सोमवासरः |
| भैया-दूज | २९ अक्टूबर | कार्तिक ०७ | गुरुवासरः |
| छठ-पूजा | ०२ नवम्बर | कार्तिक ११ | शनिवासरः |
| गुरुतेगबहादुर-शहीददिवसः | २४ नवम्बर | मार्गशीर्ष ०३ | शनिवासरः |
| क्रिसमस इव | २४ दिसम्बर | पौष ०३ | मङ्गलवासरः |

**ग्रीष्मावकाशः - 09.05.2019 तः 17.06.2019 दिनाङ्कं यावत्**

# वृत्तदर्पणे परिसरः

डा. सुशील कुमार कोटनाला को श्री ... ान से

## व्याकरण संगोष्ठी का आयोज...

देवप्रयाग। ... कीर्ति प... दो दिवस... किया गय... ऐतिहासिक... किए।

तीर्थ नगरी ... परिसर में आयोजित ... व्याकर... संगोष्ठी का शुभारंभ संस्कृत भारती के संगठ... मंत्री प्रताप सिंह ने किया। उन्होंने सभी वक्ता... व उपस्थित लोगों से संस्कृत के ज्ञान को नई पी... तक ले जाने का आह्वान किया।

बनारस हिंदू विवि के व्याकरण विभागाध्य... प्रो. बृजभूषण ओझा ने व्याकरण की संरचना ... प्रकाश डाला। कहा कि इस प्रकार के सेमिन... विषय के साथ ही शोधार्थियों के लिए महत्वपू... सिद्ध होंगे। गोष्ठी में विभिन्न विश्वविद्यालयों ... आए प्रोफेसरों व शोध छात्रों ने 30 शोध प... प्रस्तुत किए। इस मौके पर वेदव्यास परिस... हिमाचल के साहित्य विभागाध्यक्ष प्र... विजयपाल शास्त्री, प्रो. बनमाली विश्वाल, ड... प्रफुल्ल गड़पाल, डॉ. कृपाशंकर शर्मा, ड... आर बालामुरुगन, डॉ. अरविंद गौर, डॉ. सुरे... शर्मा, वीरेंद्र बर्तवाल, शैलेंद्र आदि मौजूद रहे

क्रमशः पहल, दूसर नबर



संस्कृत सप्ताह के विजेता छात्र-छात्राओं सम्मानित करते संस्कृत विधालय हरियाणा के कुलपति प्रो. श्रीयांश द्विवेदी

## संस्कृत भाषा का अध्ययन जरूरी: कुलपति

देवप्रयाग। राष्ट्रीय संस्कृत संस्थान श्री रघुनाथ कीर्ति परिसर में संस्कृत सप्ताह का समापन हो गया। इस मौके पर मुख्य अतिथि महर्षि संस्कृत विवि मुंदड़ी हरियाणा के कुलपति प्रो. श्रीयांश द्विवेदी ने कहा कि संस्कृत भाषा का अध्ययन मात्र नौकरी के लिए नहीं किया जाना चाहिए। बल्कि मनुष्य चिंतन के लिए भी आवश्यक है। कहा कि देश व विदेश में संस्कृत भाषा का महत्व बढ़ रहा है। जिसका मुख्य कारण संस्कृत भाषा में योग व आयुर्वेद जैसी विधाओं का समावेश है। विशिष्ट अतिथि अपर जिलाधिकारी रामजी शरण शर्मा ने कहा कि संस्कृत के छात्रों की वाक शैली व स्मरण शक्ति नैतिकता अन्य की तुलना में अच्छी होती है। कार्यक्रम में निबंध लेखन में क्रमशः स्थान प्राप्त करने वाले श्याम देव, संदीप कोठारी, प्रियंका, भाषण प्रतियोगिता के विजेता संदीप कोठारी, प्राची नौटियाल, बालकृष्ण व निबंध लेखन के जूनियर वर्ग की हर्षिता, रुचिका, दीक्षा तथा निबंध लेखन आधुनिक के विजेता आयुषी नेगी, शिवानी, श्रुति निबंध लेखन पारंपरिक के विजेता राम तिवाड़ी, दीपक नौटियाल व आधुनिक निबंध वर्ग की सीनियर प्रतिस्पर्धा में स्थान पाने वाली नेहा पंचभैया, वर्षा भट्ट तथा संस्कृत एकल गान के विजेता अनुरुद्ध त्रिपाठी, भावेश, श्रोतिय व संस्कृत भाषण के ... वर्ग के अमन भट्ट, आदित्य भंडारी तथा अंकित ठाकुर को पुरस्कृत ... गया। ब्यूरो

## डा. सुशील को मिला श्री रघुनाथ कीर्ति हिंदी सेवा सम्मान

देवप्रयाग। राष्ट्रीय संस्कृत संस्थान के श्री रघुनाथ कीर्ति परिसर में हिंदी पखवाड़े पर कई प्रतियोगिताएं आयोजित की गई। इस मौके पर हिंदी के क्षेत्र में सर्वश्रेष्ठ कार्य करने पर डा. सुशील कुमार कोटनाला को श्री रघुनाथ कीर्ति हिंदी सेवा सम्मान से नवाजा गया।

रविवार को कार्यक्रम के समापन पर कर्मचारियों की नोटिंग एवं ड्राफ्टिंग प्रतियोगिता में नवीन कुमार प्रथम व ओमप्रकाश द्वितीय स्थान पर रहे। जबकि सुलेख में नवीन कुमार पहले व राजेंद्र सिंह दूसरे स्थान पर रहे। दूसरी ओर छात्र-छात्राओं की निबंध प्रतियोगिता में नेहा पंचभैया व संदीप कोठारी क्रमशः प्रथम द्वितीय रहे। सुलेख प्रतियोगिता में संदीप कोठारी को पहला व श्याम देव शास्त्री को दूसरा स्थान प्राप्त हुआ। इसके अलावा आयोजित सामान्य ज्ञान प्रतियोगिता में संदीप कोठारी विजेता व शुभम भट्ट उपविजेता रहे। साथ ही भाषण में मोहित शर्मा ने पहले व श्रीनिवास ने दूसरे नंबर पर अपनी जगह बनाई। वाद विवाद में प्राची नौटियाल व कनिका गैरोला क्रमशः पहले, दूसरे नंबर पर रही। मुख्य अतिथि उत्तराखंड संस्कृत विश्वविद्यालय के कुलपति प्रो. पीयूषकांत दीक्षित ने कहा कि हिंदी हमारी संस्कृति की संवाहक है। कार्यक्रम के अध्यक्ष प्राचार्य प्रो. केबी सुब्बरायुडु ने इस मौके पर हिंदी के क्षेत्र में सर्वश्रेष्ठ कार्य के लिए डा. सुशील कुमार कोटनाला को श्री रघुनाथ कीर्ति हिंदी सेवा सम्मान से नवाजा गया। ब्यूरो

## रघुनाथवार्तावल्याः अष्टमाङ्कः लोकार्पितः

सतर्कताजागरूकतासप्ताहस्य उद्घाटनावसरे २९.१०.२०१८ दिनाङ्के परिसरे श्रीरघुनाथवार्तावल्याः अष्टमाङ्कः लोकायार्पितः।

अयम् अङ्कः संस्कृतसप्ताहविशेषाङ्कत्वेन प्रकाशितः, यत्र संस्कृतसप्ताह-हिन्दीपक्षसमेताः विविधाः वार्ताः अन्ये च स्थायिनः स्तम्भाः यथास्थानं प्राकाश्यं गताः।

## दिल्लीसंस्कृताकादम्याः सचिवचरस्य सुकवेः च डा. श्रीकृष्णसेमवाल-महोदयस्य परिसर-परिदर्शनम्

३०.१०.२०१८ दिनाङ्के दिल्लीसंस्कृताकादम्याः पूर्वसचिवः संस्कृतकविः च डा. श्रीकृष्णसेमवालमहोदयः सपरिवारं परिसरस्य परिदर्शनं कृतवान्। एतदवसरे परिसरे आधुनिकसंस्कृतसाहित्य-संसाधनकेन्द्रस्य प्रतिष्ठाविषये ज्ञात्वा सः सन्तोषं प्रकटितवान् तथा च एतस्मै केन्द्राय स्वकीयम् अभिनवं पुस्तकद्वयं समर्पितवान्।




रघुनाथवार्तावल्याः लोकार्पणस्य किञ्चनदृश्यम्



परिसरपरिदर्शनावसरस्य किञ्चन दृश्यम्




# परिसरप्रतिकृतिः



Raghunathavartavali : Quarterly News Bulletin of Shri Raghunath Kirti Campus of Rashtriya Sanskrit Sansthan, Published by the Principal for Shri Raghunath Kirti Campus, Devaprayag, Uttarakhand & Printed at D.V. Printers, 97-U.B., Jawahar Nagar, Delhi-110007